प्रतिषेधः" गौतमसूत्रस्य पञ्चमाध्याये आह्निकस्यसूत्रम् ।
"अत्रोत्तरम् । साधर्म्यात्साधर्म्यदर्शनात् संशयं आपाद्यमानेऽपि न संशयो वैधर्म्याद्वैधर्म्यदर्शनात् यदि च कार्य्यत्वरूपविशेषदर्शनेऽपि संशयस्तदाऽत्यन्तसंशयप्रसङ्गः संशयानुच्छेदप्रसङ्गः न च तथाऽभ्युपगन्तुं शक्यमित्याह नित्यत्वेति समान्यस्य सामानधर्मदर्शनस्य नित्यत्वानभ्युपगमात् नित्यसंशयजनकत्वानभ्युपगमात्तथा सति त्वदीयहेतुरपि न परपक्षप्रतिषेधकः स्यादिति भावः । सामान्यस्य गोत्वादेर्नित्यत्वानभ्युपगमात् नित्यत्वानभ्युपगमप्रसङ्गात् तत्रापि साधारणधर्मप्रमेयत्वादिना संशय एव स्यादिति केचित्" इत्तिः ।
"उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः१५" सू० ।
"क्रमप्राप्तं प्रकरणसमं लक्षयति । उभयसाधर्म्यात् प्रकर्षेण क्रिया अन्वयसहचाराद्व्यतिरेकसहचाराद्वा प्रक्रिया तत्साधनं विपरीतसाधनमिति फलितार्थः तत्सिद्धेस्तस्य पूर्वमेव सिद्धेः तथाचाधिकबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः १५ यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात् बाधदेशनाभासा चेयम्" इत्तिः ।
"प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः" सू०।
"अत्रोत्तरमाह । प्रतिपक्षाद्विपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिपक्षोपपत्तेः त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात् । अयमाशयः श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद्यो बाध उच्यते स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित्कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात्" इत्तिः ।
"त्रैकाल्यासिद्धेर्हेतोरहेतुसमः१६" सू० ।
"क्रमप्राप्तमहेतुसमं लक्षयति । त्रैकाल्यं कार्य्यकालतत्पूर्वापरकालाः तेन हेतोरसिद्धेः हेतुत्वासिद्धेः । अयमर्थः दण्डादिकं घटादेर्न पूर्ववर्त्तितया कारणं तदानीं घटादेरभावात् कस्य कारणं स्यात् अतएव न घटाद्युत्तरकालवर्त्तितयाऽपि नवा समानकालवर्त्तितया तुल्यकालवर्त्तिनोः सव्येतरविषाणयोर्विवाविनिगमनापत्तेः तथा च कालसम्बन्धखण्डनेनाहेतुतया प्रत्यवस्थानमहेतुसमः १६ कारणमात्रखण्डनेन व्याप्तिहेतोरपि खण्डनान्न तदसंग्रहं प्रतिकूलतर्कदेशनाभासा चेयम्" इत्तिः ।
"न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः" सू० ।
"अत्रोत्तरमाह । त्रैकाल्यासिद्धिस्त्रैकाल्येन याऽसिद्धिरुक्ता सा न, कुतः हेतुतः साध्यसिद्धेः त्वयाऽभ्यभ्युपगमात्" इत्तिः ।
"प्रतिषेधानुपपत्तेः प्रतिषेद्धव्याप्रतिषेधः" सू० ।
"पूर्ववर्त्तितामात्रेणैव हेतुतासम्भवात् अन्यथा त्वदीयहेतोरपि साध्यं न सिध्येदित्याह हेतुफलभाव खण्डने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्धव्यस्य परकीयहेतोर्न प्रतिषेध इत्यर्थः" इत्तिः ।
"अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः१७" सू० ।
"क्रमप्राप्तमर्थापत्तिसमं लक्षयति । अर्थापत्तिरर्थापत्त्याभासः तथा चार्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसमः १७ । अयमाशयः अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति यथा शब्दोऽनित्य इत्युक्तेऽर्थादापाद्यतेऽन्यत् नित्यं तथा च दृष्टान्तासिद्धिः विरोधश्च कृतकत्वादनित्य इत्युक्तेऽर्थादापन्नम् अन्यस्माद्धेतोर्बाधः सत्प्रतिपक्षो वा अनुमानादनित्य इत्युक्ते प्रत्यक्षान्नित्य इति च बाधः विशेषविधेः शेषनिषेधफलकत्वमित्यभिमानः सर्वदेशनाभासा चेयम्" इत्तिः ।
"अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः" सू० ।
"अत्रोत्तरम् । किमुक्तेन अनुक्तं यत्किञ्चिदेवार्थादापाद्यते उक्तोपपादकं वा आद्ये त्वत्पक्षहानिरप्यापाद्यतां त्वयानुक्तत्वात् अन्त्ये अस्या अर्थापत्तेरनैकान्तिकत्वम् ऐकान्तिकत्वम् एकपक्षसाधकत्वं बलं तन्नास्ति न हि अनित्य इत्यस्योपपादकं नित्यत्वमिति न हि विशेषविधिमात्रं शेषनिषेधफलकम्, अपि तु सति तात्पर्य्ये क्वचित् न हि नीलो घट इत्युक्ते सर्वमन्यदनीलमिति क्वचित्प्रतिपद्यते" इत्तिः ।
"एकधर्म्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः" १८ सू० ।
"अविशेषसमं लक्षयति । एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः सत्त्वात् यदि शब्दघटयोरनित्यत्वेनाविशेषः उच्यते तदा सर्वेषामविशेषप्रसङ्गः, कुतः सद्भावोपपत्तेः सतः सन्मात्रस्य ये भावाधर्माः सत्त्वप्रमे-